"पौरवी रोहिणी नाम बाह्लीकस्यात्मजाऽभवत्। ज्येष्ठा पत्नी महाराज! दयितानकदुन्दुभेः। लेभे ज्येष्ठं सुतं रामं शारणं शठमेव च। दुर्दमं दमनं शुभ्रं पिण्डारकमुशीनरम्। चित्रां नाम कुमारीञ्च रोहिणीतनयान् दश" हरिवं॰ ३६अ॰

**दुर्दमन** त्रि॰ दुःखेन दम्यतेऽसौ बा॰ युच् दुःखेन दमनं यस्य वा। १दुःखेन दमनीये २जनमेजयवंशजे कलियुगीये शतानीकात्मजे न्टपभेदे। "तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः। शतानीकाद् दुर्दमनस्तस्यापत्यं महीनरः" भाग॰ ९। २२।२८

**दुर्दर्श** त्रि॰ दुःखेन दृश्यतेऽसौ दुर्+दृश—कर्मणि खल्। द्रष्टुमशक्ये दुःखेन दर्शनयोग्ये। "सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम" गीता। "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठम् पुराणम्" कठो॰ वेदे तु दुःखेन दर्शोदर्शनमस्येत्येव वाक्यम् "भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच्" पा॰ भाषायामेव युचो विधानात्। भाषायां तु युच्। दुर्दर्शन तत्रार्थे त्रि॰ "विशेषतश्चात्र दुर्दर्शनानि पश्याणि" सुश्रु॰।

**दुर्दान्त** त्रि॰ दुःखेन दान्तः दमितः दमि—क्त वा नि॰। दुःखेन दमनीये १अशान्ते "एतया युज्यते राजा दुर्दान्त इति चोच्यते" भा॰शा॰२४अ॰। २कलहे ३वत्सतरे च राजनि॰ ४शिवे पु॰ "दीक्षितोऽदीक्षितः क्षान्तो दुर्दान्तोदान्तनाशनः" भा॰ शा॰ २८६अ॰ शिवनामोक्तौ

**दुर्दिन** न॰ दुःष्टं दिनम् प्रा॰स॰। १मेघाच्छन्ने २दिने अमरः दिनस्य प्रकाशकत्वेन मेघावरणेन तथात्वाभावात् तस्य दुष्टत्वम्। "३घनान्धकारे ४दृष्टौ च दुर्दिनं कवयो विदुः" शाब्दः। "दिनस्य अहोरात्रपरत्वेन च रात्रेरपि दुर्दिनशब्दवाच्यता।" तत्र घनान्धकारे "अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः" कुमा॰ वर्षणे "द्विषां विषह्य काकुत्स्थः तत्र नाराचदुर्दिनम्"। "न प्रसेहे निरुद्धार्कमधारावर्षदुर्दिनम्" रघुः ५दुष्टे दिनमात्रे "यदच्युतकथालापरसपीयूषवर्जितम्। तद्दिनं दुर्दिनं प्रोक्तं मेघाच्छन्नं न दुर्दिनम्" शब्दार्थचि॰धृतम्।

**दुर्दुरूट** त्रि॰ दुर्+दुल—उत्क्षेपणे कूट पृषो॰ णिलोपः लस्य रः। १नास्तिके जटा॰ "कुत्सितानि कुत्सनैः" पा॰ अस्य समासे परनिपातः मीमांसदुर्दुरूटः नास्तिकमीमांसक इत्यर्थः तस्येश्वरप्रतिषेधेन नास्तिकत्वात् निन्दनीयत्वेन तद्वाचकशब्दस्य परनिपातः।

**दुर्दृशीक** न॰ दुर्+दृश—बा॰कर्मणि ईकक्। दुर्दर्शनीये विषे "अजकाय सुदुर्दृशीकं तिरोदधे" ऋ॰७।५०।२ "सुदुर्दृशीकं सुदुर्दर्शनम् विषम्" भा॰।

**दुर्दृष्ट** त्रि॰ दुष्टं दृष्टम्। रागादिदोषेण दृष्टे "दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् न्टपेण तु। सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणन्दमम्" याज्ञ॰ "दुर्दृष्टान् स्वत्याचारप्राप्तधर्मोल्लङ्घनेन रागलोभादिभिरसम्यग्विचारितत्वेनाशङ्क्यमानान् व्यवहारान् पुनः स्वयं सम्यक् विचार्य निश्चितदोषाः पूर्वसभ्याः जयिसहिताः प्रत्येकं विवादे यो दमः पराजितस्य तं द्विगुणन्दाप्याः। अप्राप्तेत्यत्र दण्डविधिपरत्वाद्वचनस्य रागाल्लोभादित्यादिश्लोकेन अपौनरुक्त्यम्। यदा पुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टता तदा साक्षिण एव दण्ड्याः न जयी नापि सभ्याः यदा तु राजानुमत्या व्यवहारस्य दुर्दृष्टत्वन्तदा सर्व एव राजसहिताः सभ्यादयो दण्डनीयाः। "पादो गच्छति कर्त्तारि पादः साक्षिणमृच्छति। पादः सभासदः सर्वान् पादो राजानमृच्छति" इति वचनात्। एतच्च प्रत्येकं राजादीनां दोषप्रतिपादनम् न पुनरेकस्यैव पापापूर्वस्य विभागाय, यथोक्तम् "कर्त्तृसमवायिफलजननस्वभावत्वादपूर्वस्य" मिता॰।

**दुर्दैव** न॰ दुष्टं दैवम्। दुरदृष्टे दुर्भाग्ये पापे

**दुर्द्यूत** न॰ दुष्टं द्यूतम् प्रा॰स॰। १कपटद्यूतक्रीडायाम्। "भ्रातरं च विगर्हस्व ज्येष्ठं दुर्द्यूतदेविनम्" भा॰व॰८०अ॰ "अहं हि तावत् सर्वेषां तेषां दुर्द्यूतदेविनाम्" भा॰आश्र॰८अ॰

**दुर्द्रिता** स्त्री खण्डितलताभेदे जटा॰

**दुर्द्रुम** पु॰ दुष्टो द्रुमः प्रा॰स॰। पलाण्डौ राजनि॰

**दुर्द्धर** त्रि॰ दुःखेन धार्यते दुर्+धृ—कर्मणि खल्। १नरकभेदे २ऋषभौषधौ मेदि॰ ३पारदे ४भल्लातके राजनि॰ "दुर्द्धरं दुर्सखञ्चैभौ शरैर्निन्ये यमक्षयम्" देवीमा॰ उक्ते ५महिषासुरसेनापतिभेदे पु॰। ६परमेश्वरे पु॰ "दर्पहा दर्पदो दृप्तो दुर्द्धरोऽथापराजितः" विष्णुस॰ "न शक्यधारणा यस्य प्रणिधानादिषु सर्वोपाधिनिर्मुक्तत्वात्तथापि तत्प्रसादतः कैश्चित् दुःखेन हृदये धार्यते जन्मान्तरसहस्रेषु भावना योगात् तस्माद्दुर्द्धरः "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" भगवद्वचनात्" भा॰। "सुभुजो दुर्द्धरो वाग्मी" विष्णुस॰ अस्य चान्या व्युत्पत्तिः भाष्ये दर्शिता यथा "पृथिव्यादीन्यपि लोकधारकाण्यन्यैर्धारयितुमशक्यानि धारयन् केनापि